मधुसूदनसरस्वत्याः भक्तिदर्शनम्

Dr. Sujitha P.

भारतीयचिन्ताधारायां उपनिषदः आधारीकृत्य एव विविधवेदान्तदर्शनानि जातानि। तेषु वेदान्तदर्शनेषु अतीव प्रसिद्धं भवति श्रीशङ्करस्य अद्वैतवेदान्तदर्शनम्। तदनन्तरं ब्रह्मसूत्रादीनां ग्रन्थानां स्वकीयभाष्यरचनया अनेके आचार्याः वेदान्तदर्शनस्य इतरशाखाविशेषान् स्थापितवन्तः। तेषु दर्शनेषु रामानुजमध्वादिभिः प्रचलितेषुः उपासनारूपेण भक्तिः महनीयं स्थानं आवहति। षोडशशतके शाङ्करवेदान्तपारङ्गतः श्री मधुसूदनसरस्वती भगवतः श्रीकृष्णस्यापि परमभक्तःआसीत्। आचार्यः अद्वैतसिद्धान्तेन सह भक्तिमार्गस्यापि प्रणेता आसीत्। श्रीमधुसूदनसरस्वत्या विरचितानां भक्तिविषयकानां ग्रन्थानां मध्ये प्रसिद्धं भवति भक्तिरसायनम्। श्रीमद्भागवतपुराणस्य प्रथमश्लोकस्य मधुसूदनसरस्वत्या विरचितं व्याख्यानं भवति परमहंसप्रिया अथवा श्रीमद्भागवताद्यपद्यव्याख्या। भगवद्गीताशाङ्करभाषस्य तेन कृतम् भाष्यं भवति गूढार्थदीपिका। प्रबन्धेऽस्मिन भक्तिरसनिष्यन्दिनां ग्रन्थानां समीक्षणमेव क्रियते।

भक्तेः लक्षणम्

सेवनार्थकात् भज् धातोः निष्पन्नः भक्तिशब्दः विविधैः प्रयुज्यते। 'भज्यते इति भक्तिः' इति संस्कृतनिरुक्तकोशः। 'सा त्वस्मिन् परमप्रेमरूपा' इति तेष्वन्यतमः भवति[1]। 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यः[2]।

नारदपाञ्चरात्रेऽपि-

'सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते।' इति

विवेकचूडामणौ श्रीमद्शङ्कराचार्यैस्तु-

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी

स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते [३]। इति

श्रीमद्भागवतेऽपि महामुनिना कपिलेन मातरं देवहूतिं प्रति निर्गुणस्य भक्तियोगस्य लक्षणं सोपष्टम्भमेवं *प्रकाशितमस्ति-*

'मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।

मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ।।

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे [४]।।

श्री रूपगोस्वामिना स्वकीये हरिभक्तिरसामृतसिन्धावपि उत्तमभक्तेःलक्षणमित्थं वर्णितमस्ति-

'अन्याभिलाषिताशून्यं ज्ञानकर्माद्यानावृत्तम्।

आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्यते।।' इति।

भक्तेः वैविध्यम्

विभिन्नस्रोतसामाधारेण भक्तेः विविधप्रकाराः सन्ति। श्रीमद्भागवते भक्तानां सगुणनिर्गुणभेदौ विधाय सगुणभक्ताः सात्त्विकराजसतामसक्रमेण त्रिधा विभज्यन्ते। तत्र सगुणाः सात्त्विक-राजस-तामस भक्ताः सकामा कथ्यन्ते, निर्गुणाश्च भक्ताः निष्कामाः भव न्ति। तस्मिन् निर्गुणे भगवन्तं प्रति निष्कामभावनया अनन्यं प्रेम प्रजायते। जिज्ञासुः, आर्तः, अर्थार्थी चेति विशेषवन्तः भक्ताः क्रमशः सात्त्विक-राजस-तामसाः सन्ति। निर्गुणभ क्तस्तु ज्ञानी निर्मलश्चेति भगवद्गीतायां दृश्यते।

नारदभक्तिसूत्रानुसारेण भक्तिः त्रिधा विभक्तास्ति- गौणीभक्तिः पराभक्तिः, प्रेमभक्तिःचेति। तत्र प्रेमभक्तिरेव एकादशधा वभक्तास्ति। तद्यथा- १) गुणमाहा त्म्यासक्तिः २) रूपासक्तिः ३) पूजासक्तिः ४) स्मरणासक्तिः ५) दास्यासक्तिः ६) स ख्यासक्तिः ७) कान्तासक्तिः ८) वात्सल्यासक्तिः ९) आत्मनिवेदनासक्तिः १०) त न्मयासक्तिः ११) परमविरहासक्तिश्चेति। शाण्डिल्यभक्तिसूत्रे तु भक्तिः मुख्यभक्तिः गौ णीभक्तिः चेति इति द्विधा वभज्यते।

भक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिना भक्तेः भेदत्रयं विधत्तम्। तत्तु- साधनाभ क्तिः, भावभक्तिः, प्रेमभक्तिश्चेति। तत्राद्या साधनाभक्तिः पुनर्द्विधा विभज्यते-वैधी रागानुगा चेति। रागानुगाऽपि पुनः द्विधा-कामानुगा सम्बन्धानुगा चेति। कामानुगापि द्विधा प्रविभ ज्यते-सम्भोगेच्छामयी तद्भावेच्छामयी चेति। दास्य-संख्या-वात्सल्य-दाम्पत्यभेदात् सम्ब न्धरूपा भक्तिः चतुर्धा भवति।

मधुसूदनसरस्वतीमते भक्तिः

संस्कृतवाङ्मयस्येतिहासे चूडामणिभूताः श्रीमधुसूदनसरस्वती अद्वैतवेदान्ते महत्वपूर्णं स्थानमारूढाः। मोक्षप्राप्त्यर्थं ज्ञानयोगेण सह भक्तियोगस्यापि प्राधान्यं स्वकृतिभिः आचार्यः प्रतिपादयति। गूढार्थदीपिकायां सप्तमाध्यायारम्भे-

'यद् भक्तिं न विना मुक्तिर्यः सेव्यः सर्वयोगिनाम्।

तं वन्दे परमानन्दघनं श्रीनन्दनन्दनम्'। इति।

आचार्यस्य परमहंसप्रियेति प्रथितायां भागवतस्य प्रथमश्लोकटीकायां उपासनायाःनिर्वचनमाह- 'उपासनन्तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रंतन्मानसक्रियाप्रवाहरूपम्।' भक्तिरसायनस्य प्रथम प्रकरणे तृतीये श्लोके भक्तेः सामान्यलक्षणं उक्तम्-

'द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।

सर्वेशो मनसोवृत्तिर्भक्तिरित्यभिधीयते [५]।।'

कामक्रोधाद्युद्दीपनद्वारा द्रवावस्थां प्राप्तस्य चित्तस्य भगवद्गुणश्रवणेन धारावाहिकी या सर्वेशविषया भगवदाकारा मनोवृत्तिः जायते स भक्तिः। भगवद्धर्मः भगवद्गुणश्रवणं एव। आचार्येण श्रीमद्भागवतमेव प्रमाणरूपेण उद्घ्रियते। भागवतमतानुसारेण भक्तिः मनोगतिः स्यात् चेत् मधुसूदनस्य मते भक्तिः चित्तवृत्तिरेव भवति। एवं द्वयोरपि समानता दृश्यते। भक्तिविशेषप्रतिपादके द्वितीये उल्लासे तु-

'द्रुते चित्ते प्रविष्ठा या गोविन्दाकारता स्थिरा।

सा भक्तिरित्यभिहिता विशेषस्त्वधुनोच्यते [६]।'

द्रवीभूते चेतसि मनसः गोविन्दाकारतावृत्तिरेव भक्तिरित्युक्ता इति। आचार्यमतानुसारेण द्रुतचित्ते प्रविष्टं वस्तुस्थायीभावं प्राप्यते। भक्तस्य मनसि प्रतिबिम्बितः भगवतः परमानन्दस्वरूपः स्थायीभावतामासाद्य भक्तिरसस्य आनन्दस्वरूपत्वमापद्यते। आचार्यः भक्तिं भावतलात् रसतलं प्रति समुद्धरति।

श्रीमद्भागवतस्य प्रथमे स्कन्धे देवर्षिणा तारदेन भगवत्प्राप्तौ ये उपायाः वर्णिताः, संक्षेपतः त एव मधुसूदनसरस्वतीपादैः भक्तिरसायनस्य प्रथमे उल्लासे भूमिकाभेदक्रमेण कथिताः। ताः तु महत्सेवायामारभ्य प्रेम्णः परमाकाष्ठापर्यन्तं आचार्यः क्रमशः वर्णिताः।

'उपायाः प्रथमस्कन्धे नारदेनोपवर्णिताः।

सङ्क्षेपात्तानहं वक्षे भूमिभेदविभागतः।

प्रथमं महतां सेवा तत्वयापात्रता ततः।

श्रद्धाऽथ तेषां धर्मेषु ततो हरिगुणश्रुतिः।

ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतस्ततः।

प्रेमवृद्धिः परानन्दे तस्याथ स्फुरणं ततः।।

भगवद्धर्मनिष्ठातः स्वस्मिंस्तद्गुणशालिता।

प्रेम्णोऽथ परमा काष्ठेत्युदिता। भक्तिभूमिका।।'

आचार्यमत्यनुमारेण भक्तिः साधनारूपा साध्यरूपा च सः। अत्र प्रथमं महतं सेवा, तद्वयापात्रता, धर्मेषु, हरिगुणश्रुतिः इति भवति। साधनाभक्तिः, एतेषां समुदायः। त दनन्तरं साध्यभक्ति? भूमिकाक्रमेण भक्तः भक्तेः पराकाष्ठामापद्यते।

शुद्धवात्सलप्रेयोरूपेण मधुसूदनसरस्वत्या भक्तिः त्रिधा विभक्ता। तदन्तेरण मनसि भाववैविध्यवशात् (ईर्ष्याद्वेषभयहर्षा द) राजसी, तामसी, शुद्धसात्त्विकी, मिश्रिता चेत्यपि भक्तेः विभागचतुष्टायञ्च श्रूयते। उक्तायां भक्तेः पुनः प्रकारान्तरेण त्रै वध्यमाह - दृष्टमात्रफला, अदृष्टमात्रफला, दृष्टादृष्टोभयफला च इति।

मधुसूदनसरस्वत्याः गूढार्यदीपिकायां गीतायाः अष्टादश अध्यायक्रमशः षड् ध्या यैः कर्म, भक्ति, ज्ञानकाण्डक्रमाण समाकलिताः।

'सच्चिदानन्दरूपं तत्पूर्णं विष्णोः परं पदम्।

यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः।'

पञ्चमे अध्याये तु

'अनेक साधनाभ्यासनिष्पन्नं हरिणेरितम्।

स्वस्वरूपपरिज्ञानं सर्वेषां मुक्तिसाधनम्।'

'भक्त्या परमेश्वर विषयेण प्रेम्णायुक्तः'७ इति गूढार्थदीपिकायां आचार्यः।

भक्तेः रसात्मकत्वम्।

आचार्यमतेनुमारेण भक्तेः प्रेमभावं आवश्यकं भवति। तथैव भागवतप्रतिपादितायाः श्रवणकीर्तनादि नवविद्यभक्तेर प्राधान्यं भवति। आचार्यस्य टीकायां प्रसिद्धभक्तानां नामानि उदाहरणरूपेण प्रतिपादितानि। तद्यथा सुदामा, अजामिला, प्रह्लाद, ध्रुव, गोपी इत्या दीनिः। गुढार्यदीपिकायां भक्तिरसभरितानि श्लोकानि उद्घृतानि चरमः श्लोकः तेषु प्रसि द्धिः भवति। अत्र मधुसूदनसरस्वती नन्दनन्दनस्य यमुनापुलिकुञ्जलीलाधरस्य सौन्दर्य न धानस्य श्रीकृष्णस्य भक्तेः परां काष्ठाम भव्यनक्तिः-

'वंशीविभूषितकरान्नवनीरदाभात्?

पीताम्बरादरुणबिम्बफलाधरोष्ठात्।

पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्

कृष्णात्परं किमपि तत्वमहं न जाने।' इति।।

मोक्षप्राप्त्यर्थं विभिन्नमार्गणां मध्ये भक्तिः सर्वेत्कृष्टं स्थानं भजते। सर्वेषु कालेषु प्रमङ्गानुरूपं विषयं भवति भक्तिः। अन्तःकरणशुद्धयर्थं भक्तेः माहात्म्य ंप्रसिद्धमेवऊ

भज् सेवायामिति धातोर्भावे क्तन् प्रत्ययेन निष्पन्नस्य भक्तिशब्दस्य धानवर्थः 'प्रेम्णा भगवतः सेवैव' इति मधुसूदनसारस्वत्या प्रतीयते। यथा वृक्षस्य पर्णता फलेन फलेन भवति,तथैव भक्तेरपि पूर्णता परमप्रेमास्पदे पुरुषोत्तमे परमप्रेम्णैव निष्पद्यते।

भक्तेः वैशिष्ट प्रचारकाणां व भन्नाचार्याणां मध्ये मधुसूदनसरस्वत्याः श्रेष्ठतमं स्थानं अस्ति। वश्वसिन् सर्वप्रणिषु आचार्यः कृष्णं दर्शय त। भगवत्प्राप्यर्थं कायवा ङ्मनोभिः भक्तः ईश्वरे समर्पितबुद्धिः भवितव्यः। मधुसूदनसरस्वतीनां मते भक्तिः गतु भावः, किन्तु रस एव। अस्मिन् विषये 'सर्वावस्थासु भगवद्भक्तिस्त्रोपयुज्यते' इति आचार्योक्तिः प्रमाणम्। भक्तस्य मनोवृत्तिः प्राथान्यमर्हति। आचार्यः 'ईश्वरप्रेम्णा विश्वप्रेम' इति महनीयादर्शस्य वक्ता भवति।

'यस्य देवे पराभ क्तः यथा देवे तथगुरौ

तस्यैते क थता ह्यर्थाः प्रकाशन्ते महात्मनः '।।

इति श्वेताश्वेतरोपनिषदान्तर्गतं प्रसिद्धं श्लोकं भवति। एतादृशगुरुसेवाराधनातः निष्पन्ना भक्तिः मधुसूदनसरस्वत्याः मते दृश्यन्ते।

१. नारदभक्तिसूत्रम्, श्लोकं-२

२. शाणिडल्यभ क्तसूत्रम्, १.१.२

३. विवेकचूडामणि, श्लोकं-३२

४. श्रीमद् भागवतम्, ३.२९, ११-१२

५. भक्तिरसायनम्, १.३

६. भक्तिरसायनम्, २.१

७. गूढ़ार्थदीपिका, ८/१०

८. श्वेताश्वेतरोप नषत्, ६.२३